कटाक्षशतकम्

७२४०

१

श्रीगणेशायनमः॥ मोहांधकारनिवहं विनिहंतुमीडे मूकात्मनामपिमहाकवितावदान्यान्॥ श्रीकां
चिदेशशिशिरीकृतजागरूकानेकाम्रनाथतरुणीकरुणावलोकान्॥१॥ मातर्जयंतिममताग्रहमोक्ष
णानिमाहेंद्रनीलरुचिशिक्षणदक्षणानि॥ कामाक्षिकल्पितजगत्त्रयरक्षणानि त्वद्वीक्षणानिवरदान
विचक्षणानि॥२॥ आनंगतंत्रविधिदर्शितकौशलानामानंदमंदपरिघूर्णितमंथराणां॥ तारल्यमंबत
वताडितकर्णसीम्नां कामाक्षिखेलतिकटाक्षनिरीक्षणानां॥३॥ कल्लोलितेनकरुणारसवेल्लितेन
कल्माषितेनकमनीयमृदुस्मितेन॥ मांपंचितेनतवकिंचनकुंचितेनकामाक्षितेनशिशिरीकुरु
वीक्षितेन॥४॥ साहाय्यकंगतवतीमुहुरर्जुनस्यमंदस्मितेनपरितोषितभीमचेताः॥ कामाक्षिपांड
वचमूरिवतावकीनाकर्णांतिकंचलतिहंतकटाक्षलक्ष्मीः॥५॥ अस्तंक्षणान्नयतुमेपरितापसूर्य
मानंदचंद्रमसमानयतांप्रकाशं॥ कालांधकारसुषुमांकलयन्दिगंतेकामाक्षिकोमलकटा
क्षनिशागमस्ते॥६॥ ताटंकमौक्तिकरुगंकुरदंतकांतिः कारुण्यहस्तिपशिखामणिनाधिरूढः
उन्मूलयत्वशुभपादपमस्मदीयंकामाक्षितावककटाक्षमतंगजेंद्रः॥७॥ छायाभरेणजग

१

तांपरितापहारी ताटंकरत्नमणिपल्लवतल्लजश्रीः ॥ कारुण्यनामविकिरन्मकरंदजालं कामाक्षिराजतिक
टाक्षसुरद्रुमस्ते ॥८॥ सूर्याश्रयप्रणयिनी मणिकुंडलांशुलौहित्यकोकनदकाननमाननीया ॥ यातीतव
स्मरहराननकांतिसिंधुं कामाक्षिराजतिकटाक्षकलिंदकन्या ॥९॥ प्राप्नोति यं सुकृतिनं तव पक्षपातात्
कामाक्षि वीक्षणविलासकलापुरंध्री ॥ सद्यस्तमेव किल मुक्तिवधूर्वृणीते तस्मान्नितांतमनयोरिदमेकम
सं ॥१०॥ यातीसदैवमरुतामनुकूलभावं भ्रूवल्लिशार्ङ्गधनुरुल्लसितारसार्द्रा ॥ कामाक्षिकौतुकतरंगित
नीलकंठा कादंबिनीव तव भाति कटाक्षमाला ॥११॥ गंगांभसि स्मितमये तपनात्मजेव गंगाधरोरसि न
वोत्पलमालिकेव ॥ वक्त्रप्रभासरसि शैवलमंडलीव कामाक्षिराजतिकटाक्षरुचिच्छटा ते ॥१२॥ संस्मारतः
किमपि कंदलितान्नसज्जकेदारसीम्नि सुधियामुपभोगभोग्यान् ॥ कल्याणसूक्तिलहरीकलमांकुरान्नः का
माक्षि कंदलयतु त्वदपांगमेघः ॥१३॥ चांचल्यमेव नियतं कलयन्प्रकृत्या मालिन्यभूः श्रुतिपथाक्रम
जागरूकः ॥ कैवल्यमेव किमु कल्पयते नतानां कामाक्षि चित्रमपि ते करुणाकटाक्षः ॥१४॥ संजीवने जन
नि चूतशिलीमुखस्य सम्मोहने शशिकिशोरकशेखरस्य ॥ संस्तंभने च ममतागृहचेष्टितस्य कामाक्षि
वीक्षणकलापरमौषधं ते ॥१५॥ नीलोऽपि रागमधिकं जनयन्पुरारेर्लोलोऽपि भक्तिमधिकां दृढयन्

हृत्वांकजं मम विकासयतु प्रमुषणां तु हुंसमुलठरच्चेत्तामसं निरोध्या॥ दोषानुषंगजडतां जगतां धुनानः कामाक्षि वीक्षणवि
लासमनोदयस्ते ५८ चक्षुर्विमोहयति चंद्रविभूषणस्य कामाक्षि तावककटाक्षतमःप्ररोहः प्रत्यङ्मुखं तु नयनं स्तिमितं मुनीनां
प्राकाश्यमेव नयतीति परं विचित्रं ५९ कामाक्षि वीक्षणरुचा युधि निर्जितं ते नीलोत्पलं निरवशेषगताभिमानं । आगत्य तत्प
रिसरं श्रवणावतंसव्याजेन नूनमभयार्थितमातनोति ६० आश्चर्यमंबवदनाभ्युदयावतीर्णं कामाक्षि चंचलनिरीक्षणवि
भ्रमस्ते । धैर्यं विधूय तनुते हृदि रागबंधं शंभोस्तदेव विपरीततया मुनीनां ६१ जंतोः सकृत्प्रणमतो जगदीड्यतां च तेजस्वि
तां च निशितां च मतिं सभायां । कामाक्षि माक्षिकझरीमिव वैखरीं च लक्ष्मीं च पक्ष्मलयति क्षणवीक्षणं ते ६२ कादंबिनी किमय
ते न जलानुषंगं भृंगावली किमुररीकुरुते न पद्मं । किं वा कलिंदतनया सहते न गंगां कामाक्षि निश्चयपदं न तवाक्षिलक्ष्मीः ६३ का
को[illegible]लपावकतृणीकरणेपि दक्षः कामाक्षि बालकसुधाकरशेखरस्य । अत्यंतशीतलतमोप्यनुपारतं ते चित्तं विमोहयति
चित्रमयं कटाक्षः ६४ कार्पण्यपूरपरिवर्धितमंबमोहकंदोद्गतं भवमयं विषपादपं मे । तुंगं छिनत्तु तुहिनाद्रिसुते भवत्याः कांची
पुरेश्वरि कटाक्षकुठारधारा ६५ कामाक्षि घोरभवरोगचिकित्सनार्थमभ्यर्थ्य देशिककटाक्षभिषक्प्रसादात् । तत्रा
विदेचिल्लभते सुकृती कदाचित् अत्यंतदुर्लभमपांगमहौषधं ते ६६ कामाक्षि देशिककृपांकुरमाश्रयंतो नानातपोनियम
नाशितबंधाः । वासालयं तव कटाक्षममुं महांतो लब्ध्वा सुखं समधियो विचरंति लोके ६७ साकूतसंलपितसंभृतमु
ग्धहासं व्रीडानुरागसहचारि विलोकनं ते । कामाक्षि मेरवरिपोधिनिमारवीरसाम्राज्यविभ्रमदशां सफलीकरोति ६८
कामाक्षि विभ्रमबलैकनिधिर्विधाय भ्रूवल्लिचापकुटिलीकृतिमेव चित्रं । स्वाधीनतां तव निनाय शरांशकेलिंगाधराज्यसुखलाभमपां

गभीरः ६९ कामांकुरैकनिलयस्तव दृष्टिपातः कामाक्षि मन्मनसां प्रददाति कामान् । मार्गान्वितः स्वयमपि प्रकटीकरोति वैराग्यमेव क
थमेव महामुनीनां ७० कालांबुवाहनिवहैः कलहायते ते कामाक्षि कालिममदेन सदा कटाक्षः । चित्रं तथापि नितरां मसुमेव दृष्ट्वा सोत्कंठ
एव रमते किल नीलकंठः ७१ कामाक्षि मन्मथरिपुं प्रति मारतापमोहांधकारजलदागमनेन नृत्यन् । दुष्कर्मकंचुकिकुलं कबलीक
रोतु व्यामिश्रमेचकरुचिस्त्वदपांगकेकी ७२ कामाक्षि मन्मथरिपोरवलोकनेषु कांतं पयोजमिव तावकमक्षिपातं । प्रेमागमो
दिवसवद्विकचीकरोति लज्जाभरो रजनिवन्मुकुलीकरोति ७३ मूकोविरिंचति परं पुरुषः कुरूपः कंदर्पति त्रिदशराजति किंपचानः
कामाक्षि केवलं उपक्रमकाल एव लीलातरंगितकटाक्षरुचः क्षणं ते ७४ नीलालका मधुकरंति मनोज्ञनासामुक्तारुचः
प्रकटकंदबिसांकुरंति । कारुण्यमंब मकरंदति कामकोटि मन्ये ततः कमलमेव विलोचनं ते ७५ आकांक्षमाणफलदानविचक्षणा
याः कामाक्षि तावककटाक्षककामधेनोः । संपर्क एव कथमंब विमुक्तपाशबंधाः स्फुटं तनुभृतः पशुतां त्यजंति ७६ संसा
रघर्मपरितापजुषां नराणां कामाक्षि शीतलतराणि तवेक्षितानि । चंद्रातपंति घनचंदनकर्दमंति मुक्तागुणंति हिमवारिनिषेच
नंति ७७ प्रेमांबुराशिसततस्नपितानि चित्रं कामाक्षि तावककटाक्षनिरीक्षणानि ॥ संधुक्षयंति मुहुरिंधनराशिरीत्या मारद्रु
होमनसि मन्मथचित्रभानुं ७८ कालांजनप्रतिभटं कमनीयकांत्या कंदर्पतंत्रकलया कलितानुभावं । काकीविहाररसिकं कलु
षार्तिचोरं कल्लोलयस्व मयि ते करुणाकटाक्षं ७९ कांतेन मन्मथमदेन विमोह्यमानस्वांतेन चूततरुमूलगतस्य पुंसः । कांते न कि
चिदवलोकनलोचनस्य प्राप्तेन नृत्यति जनो निकांचिपुरविभूषे ८० कामाक्षि मुक्तिभुजगस्य दपोगसंगे कंठेन कंदलितका
लिमसंप्रदायाः । उत्तंसकल्पितचकोरकुटुंबपोषं नक्तंदिवप्रसवभं तयनानि भवंती ८१ नीलोत्पलप्रसवकांतिनिद
र्शनेन कारुण्यविभ्रमजुषा तव वीक्षणेन । कामाक्षि कर्मजलधेः कलशीसुतेन पाशत्रयाद्वयममी परिमोचनीयाः ८२
अत्यंत[struck through]चंचलमकृत्रिममंजनं किं झंकारभंगिरहिता किमु भृंगमाला । धूमांकुरः किमु हुताशनसंगहीनाः
कामाक्षि नेत्ररुचिनीलिमकंदली ते ८३ कामाक्षि नित्यमयमंजलिरस्तु मुक्तिबीजाय विभ्रममदोदयघूर्णिताय ॥ कंदर्प

ना.

मंन

छ्य
तम:
४

नमतां नराणां ॥ आविर्भवत्सम्मतदो धनदो ॥ बिंबमेव
संविन्मयं हृदयपूर्वगिरीन्द्रशृंगे ८७ कामाक्षि
कल्पविटपीव भवत्कटाक्षो दिक्षु समस्तविभवं नमतां नराणां

दर्किल

दर्पपुनरुद्भवसिद्धिदायककल्याणदायतव देवि दृगंचलाय ८४ दर्पांकुरीमकरकेतनविभ्रमाणां निंदां करोति विदलितोत्पल
चातुरीणां ॥ दीनांकुरो[struck] भवति मिश्रकदंबकानां कामाक्षि पालय मम तु मां लघुपांगपातैः ८५ कैवल्यदिव्यमणिरोहण
पर्वतेभ्यः कारुण्यनिर्झरपयःकृतमज्जनेभ्यः ॥ कामाक्षि किंकरितशंक[struck]रमानसेभ्यस्तेभ्यो नमोस्तु तव वीक्षणविभ्रमेभ्यः ८६ उर्व
ल्पीयत्नवल्गुमुखलंबनवाहनामी तस्य सा सरणिरंबुरुहां च किंवा ॥ दुरीमगीतदसमंजसमंजनं च कामाक्षि वीक्षणरुचो तव तर्कयामः ८७ श्री

धा

श्रीनवकुरंगशांकरोरः सीमांगणे किमपि रिंखणमादधानः ॥ हेलावधूतललितश्रवणोत्पलोसौ कामाक्षि बालइव राजति ते कटाक्षः ८८ ब्रोठी
करोति विदुषां नवसूक्तिधाटी चूतायचेव पुखुध कोकिललालल्यमानं ॥ माध्वीरसं परिमलं च निरर्गलं तं ते कामाक्षि वीक्षणविलासवसंतलक्ष्मीः ८९
कूलंकषं विततुते करुणांबुवर्षि सारस्वतं सुकृतिनः सुलभं प्रवाहं ॥ तुच्छीकरोति यमुनांबुतरंगभंगी कामाक्षि किं तव कटाक्षमहांबुवाहः ९०
जागर्ति देवि करुणाशुकसुंदरी ते ताटंकरत्नरुचिदाडिमखंडशोणे ॥ कामाक्षि निर्भरकटाक्षमरीचिपुंजमाहेंद्रनीलमणिपंजरमध्यभागे

फलं

९१ कामाक्षि सत्कुवलयस्य सगोत्रभावादाक्रामति श्रुतिमसौ तव दृष्टिपातः ॥ किं च स्फुटं कुटिलतां प्रकटीकरोति भ्रूवल्लरीपरिचितस्य किमेतत्
तत् ९२ एषा तवाक्षि सुषमा विषमायुधस्य नाराचवर्षलहरी नगराजकन्ये ॥ शंके करोति शतधा हृदि धैर्यमुद्रां श्रीकामकोटि शिशिरांशु यदसौ

२

शुमौलेः ९३ बाणेन पुष्पधनुषः परिकल्प्यमानत्राणेन भक्तमनसां करुणाकरेण ॥ कोणेन कोमलदृशस्तव कामकोटि शोणेन

पे

शोषयसि मम शोकसिंधुं ९४ मारद्रुहो मकुटसीमनि लाल्यमाने मंदाकिनीपयसि ते कुटिलं चरिष्णुः ॥ कामाक्षि कोपरभसा[struck]न्नमा द
नमीनस्संदेहमंकुरयति क्षणमक्षिपातः ९५ कामाक्षि संवलितकुंडलमौक्तिकांशुश्चंचलितश्रवणचामरचातुरीकः ॥ स्तंभे निरं
तरमपांगमये भवत्या बद्धश्चकास्ति मकरध्वजमत्तहस्ती ९६ यावत्कटाक्षरजनीसमयागमस्ते कामाक्षि तावदचिरा[struck].
न्नंगस्य नीलनलिनस्य च कांतिसंपत्सर्वस्वमेव हरती त्रिपुरं विचित्रं ९७ अस्रातमं त्रिसमनस्य सयद्विवेकमत्यतनगर्वतनत्रयी
तसमस्तशास्त्रं ॥ अप्राप्तसत्महसमीपगतं च मुक्तेः कामाक्षि नैव तव कांक्षति दृष्टिपातः ९९ अत्यंतशीतलमनर्गलकर्म राम
पाकप्रकोलहारि सुलभं सुमनोभिरेतत् ॥ पीयूषमेव तव वीक्षणमंब किंतु कामाक्षि नीलमिदमित्ययमेव भेदः १०० इति मूककविसार्व ५
भौमकृतौ कटाक्षशतकं संपूर्णं ॥ ० ॥ श्री ॥ श्री ॥ श्री ॥ ० ॥ छ ॥ संवत् १९२ नलेतानि आषाढ शु० १ शनौ लेखि ... यादृशि
णा ॥ अजितं भट्टस्यकस्येन लिखितं पुस्तकं मया ॥ यदि शुद्धमशुद्धं वा ... पाठीतस्य धैर्यो भवेत ॥ १ ॥ श्री ॥